# Dhenukasurakritam Shri Krishna Stotram

# ધેનુકાસુરકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Dhenukasurakritam Shri Krishna Stotram

File name : dhenukAsurakRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, brahmavaivartapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | shrIkRRiShNajanma, pUrvabhAga | adhyAya 22/37-57||

Latest update : March 22, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2025

*sanskritdocuments.org*

# ધેનુકાસુરકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

દાનવ ઉવાચ ।

વામનોઽસિ ત્વમંશેન મત્પિતુર્યજ્ઞભિક્ષુકઃ ।
રાજ્યહર્તા ચ શ્રીહર્તા સુતલસ્થલદાયકઃ ॥ ૩૭॥

બલિર્ભક્તિવશો વીરઃ સર્વેશો ભક્તવત્સલઃ ।
શીઘ્રં ત્વં હિન્ધિ માં પાપં શાપાદ્ગર્દભરૂપિણમ્ ॥ ૩૮॥

મુનેર્દુર્વાસસઃ શાપાદીદૃશં જન્મ કુત્સિતમ્ ।
મૃત્યુરુક્તશ્ચ મુનિના ત્વત્તો મમ જગત્પતે ॥ ૩૯॥

ષોડશારેણ ચક્રેણ સુતીક્ષ્ણેનાતિતેજસા ।
જહિ માં જગતાં નાથ સદ્ભક્તિં કુરુ મોક્ષદ ॥ ૪૦॥

ત્વમંશેન વરાહશ્ચ સમુદ્ધર્તું વસુન્ધરામ્ ।
વેદાનાં રક્ષિતા નાથ હિરણ્યાક્ષનિષૂદનઃ ॥ ૪૧॥

ત્વં નૃસિંહઃ સ્વયં પૂર્ણો હિરણ્યકશિપોર્વધે ।
પ્રહ્લાદાનુગ્રહાર્થાય દેવાનાં રક્ષણાય ચ ॥ ૪૨॥

ત્વં ચ વેદોદ્ધારકર્તા મીનાંશેન દયાનિધે ।
નૃપસ્ય જ્ઞાનદાનાય રક્ષાયૈ સુરવિપ્રયોઃ ॥ ૪૩॥

શેષાધારશ્ચ કૂર્મસ્ત્વમંશેન સૃષ્ટિહેતવે ।
વિશ્વાધારશ્ચ વિશ્વસ્ત્વમંશેનાપિ સહસ્રધૃક્ ॥ ૪૪॥

રામો દાશરથિસ્ત્વં ચ જાનક્યુદ્ધારહેતવે ।
દશકન્ધરહન્તા ચ સિન્ધૌ સેતુવિધાયકઃ ॥ ૪૫॥

કલયા પરશુરામશ્ચ જમદગ્નિસુતો મહાન્ ।
ત્રિઃસપ્તકૃત્વો ભૂપાનાં નિહન્તા જગતીપતે ॥ ૪૬॥

અંશેન કપિલસ્ત્વં ચ સિદ્ધાનાં ચ ગુરોર્ગુરુઃ ।

માતૃજ્ઞાનપ્રદાતા ચ યોગશાસ્ત્રવિધાયકઃ ॥ ૪૭॥

અંશેન જ્ઞાનિનાં શ્રેષ્ઠો નરનારાયણાવૃષી ।
ત્વં ચ ધર્મસુતો ભૂત્વા લોકવિસ્તારકારકઃ ॥ ૪૮॥

અધુના કૃષ્ણરૂપસ્ત્વં પરિપૂર્ણતમઃ સ્વયમ્ ।
સર્વેષામવતારાણાં બીજરૂપઃ સનાતનઃ ॥ ૪૯॥

યશોદાજીવનો નિત્યો નન્દૈકાનન્દવર્ધનઃ ।
પ્રાણાધિદેવો ગોપીનાં રાધાપ્રાણાધિકપ્રિયઃ ॥ ૫૦॥

વસુદેવસુતઃ શાન્તો દેવકીદુઃખભઞ્જનઃ ।
અયોનિસમ્ભવઃ શ્રીમાન્પૃથિવીભારહારકઃ ॥ ૫૧॥

પૂતનાયૈ માતૃગતિં પ્રદાતા ચ કૃપાનિધિઃ ।
બકકેશિપ્રલમ્બાનાં મમાપિ મોક્ષકારકઃ ॥ ૫૨॥

સ્વેચ્છામય ગુણાતીત ભક્તાનાં ભયભઞ્જન ।
પ્રસીદ રાધિકાનાથ પ્રસીદ કુરુ મોક્ષણમ્ ॥ ૫૩॥

હે નાથ ગાર્દભીયોનેઃ સમુદ્ધર ભવાર્ણવાત્ ।
મૂર્ખસ્ત્વદ્ભક્તપુત્રોઽહં મામુદ્ધર્તું ત્વમર્હસિ ॥ ૫૪॥

વેદા બ્રહ્માદયો યં ચ મુનીન્દ્રાઃ સ્તોતુમક્ષમાઃ ।
કિં સ્તૌમિ તં ગુણાતીતં પુરા દૈત્યોઽધુના ખરઃ ॥ ૫૫॥

એવં કુરુ કૃપાસિન્ધો યેન મે ન ભવેજ્જનુઃ ।
દૃષ્ટ્વા પાદારવિન્દં તે કઃ પુનર્ભવનં વ્રજેત્ ॥ ૫૬॥

બ્રહ્મા સ્તોતા ખરઃ સ્તોતા નોપહાસિતુમર્હસિ ।
સદીશ્વરસ્ય વિજ્ઞસ્ય યોગ્યાયોગ્યે સમા કૃપા ॥ ૫૭॥

ઇત્યેવમુક્ત્વા દૈત્યેન્દ્રસ્તસ્થૌ ચ પુરતો હરેઃ ।
પ્રસન્નવદનઃ શ્રીમાનતિતુષ્ટો બભૂવ હ ॥ ૫૮॥

ઇદં દૈત્યકૃતં સ્તોત્રં નિત્યં ભક્ત્યા ચ યઃ પઠેત્ ।
સાલોક્યસાર્ષ્ટિસામીપ્યં લીલયા લભતે હરેઃ ॥ ૫૯॥

ઇહ લોકે હરેર્ભક્તિમન્તે દાસ્યં સુદુર્લભમ્ ।
વિદ્યાં શ્રિયં સુકવિતાં પુત્રપૌત્રાન્યશો લભેત્ ॥ ૬૦॥

ઇતિ બ્રહ્મવૈવર્તપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે દ્વાવિંશાધ્યાયાન્તર્ગતં
ધાનુકાસુરકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

બ્રહ્મવૈવર્તપુરાણ । શ્રીકૃષ્ણજન્મ, પૂર્વભાગ । અધ્યાય ૨૨/૩૭-૫૭ ॥

brahmavaivartapurANa . shrIkRRiShNajanma, pUrvabhAga . adhyAya 22/37-57..

Proofread by PSA Easwaran

---

*Dhenukasurakritam Shri Krishna Stotram*
pdf was typeset on March 22, 2025

Please send corrections to *sanskrit@cheerful.com*